सः ह्रीवेल तदर्थे अमरटीकायामाह स भरतः।

ह्रुड गतौ भ्वा० आ० सक० सेट् ऋदित् चङि न ह्रस्वः। ह्रोडते अह्रोडिष्ट। [ह्रूडति अह्रूडिष्ट

ह्रूड गतौ भ्वा० आ० सक० सेट् ऋदित् चङि न ह्रस्वः।

ह्रेप गतौ भ्वा० आ० सक० सेट्। ऋदित् चङि न ह्रस्वः। ह्रेपते अह्रेपिष्ट।

ह्रेष अव्यक्तशब्दे अक० सर्पणे सक० भ्वा० आ० सेट् ऋदित् चङि न ह्रस्वः। ह्रेषते अह्रेषिष्ट।

ह्रेषा स्त्री ह्रेष–भावे अ। अश्वशब्दे अमरः।

ह्रौड गतौ भ्वा० आ० सक० सेट् ऋदित् चङि न ह्रस्वः। ह्रौडते अह्रौडिष्ट। [ह्रुडिः। ह्लगति अह्लगीत्।

ह्लग संवरणे भ्वा० प० सक० सेट् घटा० एदित् सिचि न

ह्लप भाषणे चु० उ० द्विक० सेट्। ह्लापयति ते अजिह्लपत् त।

ह्लस रवे भ्वा० प० अ० सेट्। ह्लसति अह्लसीत् अह्लासीत्।

ह्लाद शब्दे भ्वा० आत्म० अक० मोदने सक० सेट् ईदित् निष्ठायामनिट्। ह्लादते अह्लादिष्ट। ह्लादः।

आ+आनन्दे अक० आह्लादः।

ह्लादिनी स्त्री ह्लाद–णिनि ङीप्। १विद्युति २वज्रे अमरः पाठान्तरम् ३ईश्वरशक्तिभेदे च श्रीधरः ४ह्लादविशिष्टे त्रि०

ह्वल चलने भ्वा० प० अक० सेट्। ह्वलति अह्वालीत्। घटा० प्रह्वलयति अनुपसर्गस्य वा ह्रस्वः ह्वलयति ह्वालयति।

ह्वान न० ह्वे–ल्युट्। आह्वाने। [जह्वरतुः।

ह्वृ कुटिलीकरणे भ्वा० प० सक० अनिट्। ह्वरति अह्वार्षीत्।

ह्वे स्पर्द्धायां शब्दे च अक० आह्वानार्थे सक० भ्वा० उभ० यजा० अनिट्। ह्वयति अह्वत्–अह्वत अह्वास्त सम्प्र० जुहाव आहूतः आहूतिः।

आ+स्पर्द्धायाम् आत्म० शत्रुमाह्वयते। शिवम्।

ओं तत्सत्।

इति श्रीतारानाथतर्कवाचस्पतिभट्टाचार्य्यसङ्कलिते

वाचस्पत्ये हकारादिशब्दार्थसङ्कलनम्।

---

## ग्रन्थकर्तृवंशादि।

राढ़ीयश्रेणीविख्यातकेँ जिडि[illegible]क: किल। यशोहरप्रदेशस्थसारलावसथे स्थित:॥

सार्वभौमोपाधियुक्त: कमलाकान्तसंज्ञक:। सच्छ्रोत्रिय: क्षितौ ख्यातो वात्स्यवंशावतंसक:॥

मुकुन्दरामनामासीत् तदन्वयसमुद्भव:। तत्प्रदेशस्थवैचण्डीग्रामवासी स्वकार्य्यत:॥

तर्कसिद्धान्तोपनामा रामरामस्तदात्मज:। सदा शिवशिवेत्युक्त्या प्राप्त: शिवशिवाभिधाम्॥

नानाविद्याधरत्वेन प्राप विद्याधराह्वयम्। भागीरथीतीरवासी भवबन्धजिहीर्षया॥

वर्द्धमानप्रदेशस्थाम्बिकाग्रामेऽवसच्चिरम्। अन्ते काशीं समासाद्य पञ्चत्वं प्राप्य मुक्तिभाक्॥

अम्बिकावासकालेऽस्य जातौ वंशधरौ सुतौ। तर्कपञ्चाननोपाधिर्दुर्गादासस्तु मध्यम:॥

सार्वभौमोपाधियुत: कनीयांस्तु तदात्मज:। कालिदासाभिधो नानाशास्त्रविद्याविशारद:॥

तस्याहं प्रथम: पुत्रस्तारानाथाह्वयो द्विज:। तर्कवाचस्पत्युपाधिं गुरुतो लब्धवान् स्वत:॥

नगरे कलिकाताख्ये गवर्णमेण्टनिवेशिते। संस्कृतपाठशालाख्ये मठे पूर्वमधीतवान्॥

काश्यादिनानास्थानेषु लब्धविद्यस्तत: क्रमात्। तत्रैव पाठशालायां तदध्यक्षेण पूर्वत:॥

पाणिन्यादिव्याकरणपाठनार्थे नियोजित:। पश्चात् दर्शनशास्त्रस्याध्यापनायापि योजित:॥

प्रायस्त्रिंशद्वत्सरान्तं तत्कर्मानुष्ठितं मया। सिद्धान्तकौमुदीव्याख्या सरलाख्या तदा कृता॥

तदैव तत्त्वकौमुद्या व्याख्याऽपि यत्नत: कृता। सिद्धान्तविन्दुसारोऽपि शब्दस्तोममहानिधि:॥